श्रीरामपट्टाभिषेकसर्गः ॥

शिरस्यञ्जलिमाधाय कैकेय्यानन्दवर्धनः । बभाषे भरतो ज्येष्ठं रामं सत्यपराक्रमम् ॥ १ ॥
पूजिता मामिका माता दत्तं राज्यमिदं मम । तददामि पुनस्तुभ्यं यथा त्वमददा मम ॥
धुरमेकाकिना न्यस्तामृषभेण बलीयसा । किशोरवदुरुं भारं न वोढुमहमुत्सहे ॥ ३ ॥
वारिवेगेन महता भिन्नः सेतुरिव क्षरन् । दुर्बन्धनमिदं मन्ये राज्यच्छिद्रमसंवृतम् ॥ ४ ॥
गतिं खर इवाश्वस्य हंसस्येव च वायसः । नान्वेतुमुत्सहे राम तव मार्गमरिन्दम ॥ ५ ॥
यथा चारोपितो वृक्षो जातश्चान्तर्निवेशने । महांश्च सुदुरारोहो महास्कन्धप्रशाखवान् ॥
शीर्येत पुष्पितो भूत्वा न फलानि प्रदर्शयन् । तस्य नानुभवेदर्थं यस्य हेतोः सरोप्यते ॥
एषोपमा महाबाहो त्वदर्थं वेत्तुमर्हसि । यद्यस्मान् मनुजेन्द्र त्वं भक्तान् भृत्यान् न शाधि हि ॥
जगदद्याभिषिक्तं त्वामनुपश्यतु सर्वतः । प्रतपन्तमिवादित्यं मध्याह्ने दीप्ततेजसम् ॥ ९ ॥
तूर्यसङ्घातनिर्घोषैः काञ्चीनूपुरनिस्वनैः । मधुरैर्गीतशब्दैश्च प्रतिबुध्यस्व राघव ॥ १० ॥
यावदावर्तते चक्रं यावती च वसुन्धरा । तावत्त्वमिह सर्वस्य स्वामित्वमनुवर्तय ॥ ११ ॥
भरतस्य वचः श्रुत्वा रामः परपुरञ्जयः । तथेति प्रतिजग्राह निषसादासने शुभे ॥ १२ ॥
ततः शत्रुघ्नवचनान्निपुणाः श्मश्रुवर्धकाः । सुखहस्ताः सुशीघ्राश्च राघवं पर्युपासत ॥ १३ ॥
पूर्वं तु भरते स्नाते लक्ष्मणे च महाबले । सुग्रीवे वानरेन्द्रे च राक्षसेन्द्रे विभीषणे ॥
विशोधितजटः स्नातश्चित्रमाल्यानुलेपनः । महार्हवसनो रामस्तस्थौ तत्र श्रिया ज्वलन् ॥
प्रतिकर्म च रामस्य कारयामास वीर्यवान् । लक्ष्मणस्य च लक्ष्मीवानिक्ष्वाकुकुलवर्धनः ॥
प्रतिकर्म च सीतायाः सर्वा दशरथस्त्रियः । आत्मनैव तदा चक्रुर्मनस्विन्यो मनोहरम् ॥
ततो वानरपत्नीनां सर्वासामेव शोभनम् । चकार यत्नात् कौसल्या प्रहृष्टा पुत्रवत्सला ॥
ततः शत्रुघ्नवचनात् सुमन्त्रो नाम सारथिः । योजयित्वाऽभिचक्राम रथं सर्वाङ्गशोभनम् ॥
अर्कमण्डलसङ्काशं दिव्यं दृष्ट्वा रथोत्तमम् । आरुरोह महाबाहू रामः सत्यपराक्रमः ॥
सुग्रीवो हनुमांश्चैव महेन्द्रसदृशद्युती । स्नातौ दिव्यनिभैर्वस्त्रैर्जग्मतुः शुभकुण्डलौ ॥ २१ ॥

CC-0. In Public Domain. Digitized by Muthulakshmi Research Academy

वराभरणसम्पन्ना ययुस्ताः शुभकुण्डलाः । सुग्रीवपत्नयः सीता च द्रष्टुं नगरमुत्सुकाः ॥
अयोध्यायां तु सचिवा राज्ञो दशरथस्य ये । पुरोहितं पुरस्कृत्य मन्त्रयामासुरर्थवत् ॥
अशोको विजयश्चैव सुमन्त्रश्चैव संगताः । मन्त्रयन् रामवृद्ध्यर्थमृद्ध्यर्थं नगरस्य च ॥
सर्वमेवाभिषेकार्थं जयार्हस्य महात्मनः । कर्तुमर्हथ रामस्य यद्यन्मङ्गलपूर्वकम् ॥ २५ ॥
इति ते मन्त्रिणः सर्वे संदिश्य तु पुरोहितम् । नगरान्निर्ययुस्तूर्णं रामदर्शनबुद्धयः ॥ २६ ॥
हरियुक्तं सहस्राक्षो रथमिन्द्र इवानघः । प्रययौ रथमास्थाय रामो नगरमुत्तमम् ॥ २७ ॥
जग्राह भरतो रश्मीन् शत्रुघ्नश्छत्रमाददे । लक्ष्मणो व्यजनं तस्य मूर्ध्नि संपर्य वीजयत् ॥
श्वेतं च वालव्यजनं जग्राह पुरतः स्थितः । अपरं चन्द्रसङ्काशं राक्षसेन्द्रो विभीषणः ॥
ऋषिसङ्घैस्तदाकाशे देवैश्च समरुद्गणैः स्तूयमानस्य रामस्य शुश्रुवे मधुरध्वनिः ॥ ३० ॥
ततः शत्रुञ्जयं नाम कुञ्जरं पर्वतोपमम् । आरुरोह महातेजाः सुग्रीवः प्लवगर्षभः ॥ ३१ ॥
नवनागसहस्राणि ययुरास्थाय वानराः । मानुषं विग्रहं कृत्वा सर्वाभरणभूषिताः ॥ ३२ ॥
शङ्खभेरीप्रणादैश्च दुन्दुभीनां च निस्वनैः । प्रययौ पुरुषव्याघ्रस्तां पुरीं हर्म्यमालिनीम् ॥
ददृशुस्ते समायान्तं राघवं सपुरःसरम् । विराजमानं वपुषा रथेनातिरथं तदा ॥ ३४ ॥
ते वर्धयित्वा काकुत्स्थं रामेण प्रतिनन्दिताः । अनुजग्मुर्महात्मानं भ्रातृभिः परिवारितम् ॥
अमात्यैर्ब्राह्मणैश्चैव तथा प्रकृतिभिर्वृतः । श्रिया विरुरुचे रामो नक्षत्रैरिव चन्द्रमाः ॥ ३६ ॥
सपुरोगामिभिस्तूर्यैस्तालस्वस्तिकपाणिभिः । प्रव्याहरद्भिर्मुदितैर्मङ्गलानि ययौ वृतः ॥
अक्षतं जातरूपं च गावः कन्यास्तथा द्विजाः । नरा मोदकहस्ताश्च रामस्य पुरतो ययुः ॥
सख्यं च रामः सुग्रीवे प्रभावं चानिलात्मजे । वानराणां च तत्कर्म राक्षसानां च तद्बलम् ॥
विभीषणस्य संयोगमाचचक्षे च मन्त्रिणाम् । श्रुत्वा तु विस्मयं जग्मुरयोध्यापुरवासिनः ॥
द्युतिमानेतदाख्याय रामो वानरसंवृतः । हृष्टपुष्टजनाकीर्णामयोध्यां प्रविवेश ह ॥ ४१ ॥
ततो ह्यभ्युच्छ्रयन् पौराः पताकास्ते गृहे गृहे ॥ ४२ ॥
ऐक्ष्वाकाध्युषितं रम्यमाससाद पितुर्गृहम् ॥ ४३ ॥
पितुर्भवनमासाद्य प्रविश्य च महात्मनः । कौसल्यां च सुमित्रां च कैकेयीमभिवाद्य च ॥
अथाब्रवीद्राजसुतो भरतं धर्मिणां वरम् । अर्थोपहितया वाचा मधुरं रघुनन्दनः ॥ ४५ ॥
यच्च मद्भवनं श्रेष्ठं साशोकवनिकं महत् । मुक्तावैडूर्यसङ्कीर्णं सुग्रीवाय निवेदय ॥ ४६ ॥
तस्य तद्वचनं श्रुत्वा भरतः सत्यविक्रमः । पाणौ गृहीत्वा सुग्रीवं प्रविवेश तमालयम् ॥
ततस्तैलप्रदीपांश्च पर्यङ्कास्तरणानि च । गृहीत्वा विविशुः क्षिप्रं शत्रुघ्नेन प्रचोदिताः ॥
उवाच च महातेजाः सुग्रीवं राघवानुजः । अभिषेकाय रामस्य दूतानाज्ञापय प्रभो ॥

CC-0. In Public Domain. Digitized by Muthulakshmi Research Academy

सौवर्णान् वानरेन्द्राणां चतुर्णां चतुरो घटान्। ददौ क्षिप्रं स सुग्रीवः सर्वरत्नविभूषितान् ॥
यथा प्रत्यूषसमये चतुर्णां सागरांभसाम्। पूर्णैर्घटैः प्रतीक्षध्वं तथा कुरुत वानराः ॥५१॥
एवमुक्ता महात्मानो वानरा वारणोपमाः। उत्पेतुर्गगनं शीघ्रं गरुडा इव शीघ्रगाः ॥५२॥
जांबवांश्च हनूमांश्च वेगदर्शी च वानराः। ऋषभश्चैव कलशाञ्जलपूर्णानथानयन् ॥५३॥
नदीशतानां पञ्चानां जलं कुंभेषु चाहरन् ॥५४॥
पूर्वात्समुद्रात्कलशं जलपूर्णमथानयत्। जांबवान् सत्वसंपन्नाः सर्वरत्नविभूषितम् ॥५५॥
ऋषभो दक्षिणात्तूर्णं समुद्राज्जलमाहरत्। रक्तचन्दनशाखाभिः संवृतं काञ्चनं घटम् ॥
गवयः पश्चिमा तोयमाजहार महार्णवात्। रत्नकुम्भेन महता शीतं मारुतविक्रमः ॥५७॥
उत्तराच्च जलं शीघ्रं गरुडानिलविक्रमः। आजहार सधर्मात्मा हनुमान् मारुतात्मजः ॥
ततस्तैर्वानरश्रेष्ठैरानीतं प्रेक्ष्य तज्जलम् ॥५८॥
अभिषेकाय रामस्य शत्रुघ्नः सचिवैः सह। पुरोहिताय श्रेष्ठाय सुहृद्भ्यश्च न्यवेदयत् ॥

॥ श्रीरामस्य पट्टाभिषेकघट्टः ॥

ततः समयतो वृद्धो वसिष्ठो ब्राह्मणैः सह। रामं रत्नमये पीठे सहसीतं न्यवेशयत् ॥
वसिष्ठो वामदेवश्च जाबालिरथ काश्यपः। कात्यायनः सुयज्ञश्च गौतमो विजयस्तथा ॥
अभ्यषिञ्चन्नरव्याघ्रं प्रसन्नेन सुगन्धिना। सलिलेन सहस्राक्षं वसवो वासवं यथा ॥
ऋत्विग्भिर्ब्राह्मणैः पूर्वं कन्याभिर्मन्त्रिभिस्तथा। योधैश्चैवाभ्यषिञ्चंस्ते संप्रहृष्टाः सनैगमैः ॥
सर्वौषधिरसैर्दिव्यैर्दिवतैर्नभसि स्थितैः। चतुर्भिर्लोकपालैश्च सर्वैर्देवैश्च संगतैः ॥६४॥
छत्रं तु तस्य जग्राह शत्रुघ्नः पाण्डुरं शुभम्। श्वेतं च वालव्यजनं सुग्रीवो वानरेश्वरः ॥
अपरं चन्द्रसङ्काशं राक्षसेन्द्रो विभीषणः ॥६५॥
मालां ज्वलन्तीं वपुषा काञ्चनीं शतपुष्कराम्। राघवाय ददौ वायुर्वासवेन प्रचोदितः ॥
सर्वरत्नसमायुक्तं मणिरत्नविभूषितम्। मुक्ताहारं नरेन्द्राय ददौ शक्रप्रचोदितः ॥६७॥
प्रजगुर्देवगन्धर्वा ननृतुश्चाप्सरोगणाः। अभिषेके तदर्हस्य तदा रामस्य धीमतः ॥६८॥
भूमिः सस्यवती चैव फलवन्तश्च पादपाः। गन्धवन्ति च पुष्पाणि बभूवू राघवोत्सवे ॥
सहस्रशतमश्वानां धेनुनां च गवां तथा। ददौ शतं वृषान् पूर्वं द्विजेभ्यो मनुजर्षभः ॥
त्रिंशत्कोटीर्हिरण्यस्य ब्राह्मणेभ्यो ददौ पुनः। नानाभरणवस्त्राणि महार्हाणि च राघवः ॥
अर्करश्मिप्रतीकाशां काञ्चनीं मणिविग्रहाम्। सुग्रीवाय स्रजं दिव्यां प्रायच्छन्मनुजर्षभः ॥
वैडूर्यमणिचित्रे च वज्ररत्नविभूषिते। वालिपुत्राय धृतिमानङ्गदायाङ्गदे ददौ ॥७३॥

CC-0. In Public Domain. Digitized by Muthulakshmi Research Academy

मणिप्रवरजुष्टं च मुक्ताहारमनुत्तमम् । सीतायै प्रददौ रामश्चन्द्ररश्मिसमप्रभम् ॥ ७४ ॥
अरजे वाससी दिव्ये शुभान्याभरणानि च । अवेक्षमाणा वैदेही प्रददौ वायुसूनवे ॥
अवमुच्यात्मनः कण्ठात् हारं जनकनन्दिनी । अवैक्षत हरीन् सर्वान् भर्तारं च मुहुर्मुहुः ॥
तामिङ्गितज्ञः संप्रेक्ष्य बभाषे जनकात्मजाम् । प्रदेहि सुभगे हारं यस्य तुष्टाऽसि भामिनि ॥
तेजो धृतिर्यशो दाक्ष्यं सामर्थ्यं विनयो नयः । पौरुषं विक्रमो बुद्धिर्यस्मिन्नेतानि सर्वशः ॥
ददौ सा वायुपुत्राय तं हारमसितेक्षणा ॥ ७९ ॥
हनुमांस्तेन हारेण शुशुभे वानरर्षभः । चन्द्रांशुचयगौरेण श्वेताभ्रेण यथाऽचलः ॥ ८० ॥
ततो द्विविदमैन्दाभ्यां नीलाय च परन्तपः । सर्वान् कामगुणान् वीक्ष्य प्रददौ वसुधाधिपः ॥
सर्ववानरवृद्धाश्च ये चान्ये वानरेश्वराः । वासोभिर्भूषणैश्चैव यथार्हं प्रतिपूजिताः ॥
विभीषणोऽथ सुग्रीवो हनुमाञ्जाम्बवांस्तथा । सर्ववानरमुख्याश्च रामेणाक्लिष्टकर्मणा ॥
यथार्हं पूजिताः सर्वैः कामैः रत्नैश्च पुष्कलैः । महृष्टमनसः सर्वे जग्मुरेव यथागतम् ॥ ८४ ॥
नत्वा सर्वे महात्मानं ततस्ते प्लवगर्षभाः । विसृष्टाः पार्थिवेन्द्रेण किष्किन्धामभ्युपागमन् ॥
सुग्रीवो वानरश्रेष्ठो दृष्ट्वा रामाभिषेचनम् । पूजितश्चैव रामेण किष्किन्धां प्राविशत्पुरीम् ॥
विभीषणोऽपि धर्मात्मा सह तैर्नैर्ऋतर्षभैः । लब्ध्वा कुलधनं राजा लङ्कां प्रायान्महायशाः ॥
स राज्यमखिलं शासन्निहतारिर्महायशाः । राघवः परमोदारः शशास परया मुदा ॥
उवाच लक्ष्मणं रामो धर्मज्ञं धर्मवत्सलः ॥ ८९ ॥

आतिष्ठ धर्मज्ञ मया सहेमां गां पूर्वराजाध्युषितां बलेन ।
तुल्यं मया त्वं पितृभिर्धृता या तां यौवराज्ये धुरमुद्वहस्व ॥ ९० ॥

सर्वात्मना पर्यनुनीयमानो यदा न सौमित्रिरुपैति योगम् ।
नियुज्यमानोऽपि च यौवराज्ये ततोऽभ्यषिञ्चद्भरतं महात्मा ॥ ९१ ॥

पौण्डरीकाश्वमेधाभ्यां वाजपेयेन चासकृत् । अन्यैश्च विविधैर्यज्ञैरयजत्पार्थिवर्षभः ॥ ९२ ॥
राज्यं दशसहस्राणि प्राप्य वर्षाणि राघवः । शताश्वमेधानाजह्रे सदश्वान् भूरिदक्षिणान् ॥
आजानुलम्बबाहुः स महास्कन्धः प्रतापवान् । लक्ष्मणानुचरो रामः पृथिवीमन्वपालयत् ॥
राघवश्चापि धर्मात्मा प्राप्य राज्यमनुत्तमम् । ईजे बहुविधैर्यज्ञैः ससुहृज्ज्ञातिबान्धवः ॥
न पर्यदेवन्विधवा न च व्यालकृतं भयम् । न व्याधिजं भयं चासीद्रामे राज्यं प्रशासति ॥
निर्दस्युरभवल्लोको नानर्थः कंचिदस्पृशत् । न च स्म वृद्धा बालानां प्रेतकार्याणि कुर्वते ॥
सर्वं मुदितमेवासीत्सर्वो धर्मपरोऽभवत् । राममेवानुपश्यन्तो नाभ्यहिंसन् परस्परम् ॥
आसन्वर्षसहस्राणि तथा पुत्रसहस्रिणः । निरामया विशोकाश्च रामे राज्यं प्रशासति ॥

CC-0. In Public Domain. Digitized by Muthulakshmi Research Academy

रामो रामो राम इति प्रजानामभवन् कथाः । रामभूतं जगदभूद्रामे राज्यं प्रशासति ॥
नित्यपुष्पा नित्यफलास्तरवः स्कन्धविस्तृताः । काले वर्षी च पर्जन्यः सुखस्पर्शश्च मारुतः ॥
ब्राह्मणाः क्षत्रिया वैश्याः शूद्रा लोभविवर्जिताः । स्वकर्मसु प्रवर्तन्ते तुष्टाः स्वैरेव कर्मभिः ॥
आसन् प्रजा धर्मरता रामे शासति नानृताः । सर्वे लक्षणसम्पन्नाः सर्वे धर्मपरायणाः ॥
दशवर्षसहस्राणि दशवर्षशतानि च । भ्रातृभिः सहितः श्रीमान् रामो राज्यमकारयत् ॥
धन्यं यशस्यमायुष्यं राज्ञां च विजयावहम् । आदिकाव्यमिदं त्वार्षं पुरा वाल्मीकिना कृतम् ॥
यः पठेच्छृणुयाल्लोके नरः पापाद्विमुच्यते ॥ १०५ ॥
पुत्रकामस्तु पुत्रान्वै धनकामो धनानि च । लभते मनुजो लोके श्रुत्वा रामाभिषेचनम् ॥
महीं विजयते राजा रिपूंश्चाप्यधितिष्ठति । राघवेण यथा माता सुमित्रा लक्ष्मणेन च ॥
भरतेनैव कैकेयी जीवपुत्रास्तथा स्त्रियः ॥ १०७ ॥
श्रुत्वा रामायणमिदं दीर्घमायुश्च विन्दति । रामस्य विजयं चैव सर्वमक्लिष्टकर्मणः ॥ १०८ ॥
शृणोति य इदं काव्यमार्षं वाल्मीकिना कृतम् । श्रद्दधानो जितक्रोधो दुर्गाण्यतितरत्यसौ ॥
समागमं प्रवासान्ते लभते चापि बान्धवैः । प्रार्थितांश्च वरान् सर्वान् प्राप्नुयादिह राघवात् ॥
श्रवणेन सुराः सर्वे प्रीयन्ते संप्रशृण्वताम् । विनायकाश्च शाम्यन्ति गृहे तिष्ठन्ति यस्य वै ॥
विजयेत महीं राजा प्रवासी स्वस्तिमान्व्रजेत् । स्त्रियो रजस्वलाः श्रुत्वा पुत्रान् सूयुरनुत्तमान् ॥
पूजयंश्च पठंश्चेममितिहासं पुरातनम् । सर्वपापात्प्रमुच्येत दीर्घमायुरवाप्नुयात् ॥ ११३ ॥
प्रणम्य शिरसा नित्यं श्रोतव्यं क्षत्रियैर्द्विजात् । ऐश्वर्यं पुत्रलाभश्च भविष्यति न संशयः ॥
रामायणमिदं कृत्स्नं शृण्वतः पठतः सदा । प्रीयते सततं रामः सहि विष्णुः सनातनः ॥
आदिदेवो महाबाहुर्हरिर्नारायणः प्रभुः ॥ ११५ ॥

कुटुंबवृद्धिं धनधान्यवृद्धिं स्त्रियश्च मुख्याः सुखमुत्तमं च ।
श्रुत्वा शुभं काव्यमिदं महार्थं प्राप्नोति सर्वां भुवि चार्थसिद्धिम् ॥ ११६ ॥
आयुष्यमारोग्यकरं यशस्यं सौभ्रातृकं बुद्धिकरं सुखं च ।
श्रोतव्यमेतन्नियमेन सद्भिराख्यानमोजस्करमृद्धिकामैः ॥ ११७ ॥

एवमेतत्पुरावृत्तमाख्यानं भद्रमस्तु वः । प्रव्याहरत विस्रब्धं बलं विष्णोः प्रवर्धताम् ॥११८॥
देवाश्च सर्वे तुष्यन्ति ग्रहणाच्छ्रवणात्तथा । रामायणस्य श्रवणात्तुष्यन्ति पितरस्तथा ॥
भक्त्या रामस्य ये चेमां संहितामृषिणा कृताम् । लेखयन्तीह च नरास्तेषां वासस्त्रिविष्टपे ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे
श्रीरामपट्टाभिषेको नाम एकत्रिंशदुत्तरशततमः सर्गः ॥

CC-0. In Public Domain. Digitized by Muthulakshmi Research Academy